# संस्कृतवार्ता:

**दिनाङ्क : 24/01/2025** **सायम् - 06:20**

## मुख्यवार्ता:

- विदेशसचिवः विक्रम-मिस्री इत्येष: आगामिन: रविवासरात् आरभ्य चीनदेशस्य द्विदिवसीययात्रायाम् भविष्यति।
- रक्षामंत्री राजनाथसिंहः नवदिल्ल्यां युद्धक्षेत्र-निरीक्षण-प्रणाल्याः सञ्जय्-इत्यस्या: शुभारम्भं कृतवान्।
- जल-शक्तिमंत्री सी. आर. पाटिलः सबलम् प्रतिपादितवान् यत् भारतं न केवलं जल-संरक्षणाय पूर्णतो दृशा अस्ति प्रतिबद्धम् अपितु अस्मिन् महत्त्वपूर्णक्षेत्रे एकां परिवर्तनकारिणीं क्रान्तिमपि जनयति ।
- अद्य नवदिल्ल्यां भारत-निर्वाचन-आयोगस्य द्विदिवसीयसम्मेलने त्रयोदश देशानाम् निर्वाचन-प्रबन्धन-निकायानां त्रिंशदधिक-संख्यका: प्रतिनिधयः भागं भजन्ति।
- दिल्ली-विधानसभा-निर्वाचनाय प्रचारः तीव्रगत्यां प्रचलति, राजनैतिक-दलानां प्रमुखाः नेतारः मतदातॄन् आक्रष्टुं जनसभा: कुर्वन्ति।
- आस्ट्रेलियन्-ओपन्-टेनिस्-क्रीडायां नोवाक्-जोकोविच इत्येतस्य क्षतेः कारणात् अलेक्ज़ेण्डर् ज्वेरेव् इत्येषः पुरुष-एकल-वर्गस्य अन्त्यचक्रे प्रविष्टवान्।

## विदेशसचिव: विक्रम मिस्री

विदेशसचिवः विक्रम-मिस्रीइत्येष: आगामिन: रविवासरात् आरभ्य द्विदिवयीयात्रायां चीनदेशं प्रति यास्यति यत्र भारत-चीनदेशयोः मध्ये विदेशसचिव-उपमन्त्रि-तन्त्रस्य मेलनं भविष्यति। विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जयसवाल: नवदिल्ल्यां वार्तालापं कुर्वन् अवदत् यत्, विदेशसचिवः चीनदेशे विदेशसचिवेन सह मिलिष्यति, यत्र द्वैपाक्षिक-हितानां सर्वाणि विषयानि चर्चिष्यन्ते। अवैधप्रवासस्य विषये प्रश्नेषु जैस्वालः अवदत् यत्, भारतं अवैधप्रवासस्य विरुद्धं वर्तते, विशेषतः यतः एषः सङ्घटित-अपराधस्य अनेकप्रकारैः सह सम्बद्धः अस्ति इति। सः अवदत् यत्, भारतीयानां कृते, न केवलं संयुक्तराज्यामेरिका-देशे, अपितु विश्वस्य कस्मिन् अपि स्थाने, यदि ते भारतीय-नागरिकाः सन्ति, तथा च ते अधिककालं यावत् तिष्ठन्ति, अथवा ते सम्यक् प्रलेखनं विना कस्मिंश्चित् देशे सन्ति, तर्हि भारतसर्वकारः तान् पुनः ग्रहीष्यति।

## राजनाथसिंह:-सञ्जय:

रक्षामन्त्री राजनाथसिंह: अद्य नवदिल्ल्याम् युद्ध-क्षेत्र-निरीक्षण-प्रणाल्या: सञ्जय इत्येतस्या: शुभारम्भं कृतवान्। इदं हि निरीक्षण-प्रणाली युद्धक्षेत्रस्य पारदर्शितां संवर्धयिष्यति अथ च भविष्यस्य युद्धक्षेत्राणि परिवर्तयिष्यति यतोहि इदं हि खलु अत्याधुनिक-संवेदक-यन्त्रै अत्याधनिक-विश्लेषण-यन्त्रैश्च संवलितास्ति। प्रणाली एषा अस्मिन् वर्षे मार्चमासात् आरभ्य भारतीयसेनायां त्रिषु चरणेषु सम्मिलिताा भविष्यति। रक्षामन्त्रालयानुसारि अनया प्रणाल्या गुप्तचरविभागा: तत्सम्बद्धानि अन्वेषणकार्याणि इतोऽपि संवर्धिष्यन्ते। अपि च भारतीयसेनायां दत्तांशस्य आन्तार्जालिक-सञ्चालनस्य च दिशि नवीन: पदक्षेपो भविष्यति। सञ्जय इत्याख्या प्रणाली भारतीय सेना-भारत-इलेम्ट्रॉनिक्स-लिमिटेड-इत्युभाभ्यां संयुक्तरूपेण विकसिता। अस्या प्रणाल्या: समग्रव्ययं द्वयधिक-चतुश्शतोत्तर-द्विसहस्रकोटिरुप्यकाणि यावदस्ति। एषा युद्धक्षेत्र-निरीक्षण-प्रणाली सञ्जय इति आगामिनि गणतन्त्रदिवस-पथसञ्चलनावधौ कर्तव्यपथे मुख्याकर्षणात्वेन स्वीयस्थानं प्रतिपादयिष्यति।

## जलशक्तिमन्त्री

जल-शक्तिमन्त्री सी. आर. पाटिलः सबलम् इदं प्रतिपादिवान् यत् भारतं न केवलं जल संरक्षणाय पूर्णतो दृशा अस्ति प्रतिबद्धम् अपितु अस्मिन् महत्त्वपूर्णक्षेत्रे एकां परिवर्तनकारिणीं क्रान्तिमपि जनयति । दावोसनगरे ऐषमः विश्वार्थिकमंचस्य भारतपैवेलियन् इत्याख्ये मण्डपे मुख्य भाषणं कुर्वन् श्री पाटिलः अवोचत् यत् बृहन्मात्रायां कृतप्रयासैः राष्ट्रम् स्वजलसंसाधनानि भृशं सुदृढं कृतवत् येन हि सततरूपेण जलप्रबन्धनाय एकं वैश्विकं मानकं स्थापितमस्ति । अन्ताराष्ट्रियसहयोगं सामूहिककार्यजातं च सुदृढयितुं समाह्वयन् श्री पाटिलः इदं स्पष्टीकृतवान् यत् जलाभावः यद्धि जलवायुपरिवर्तनेन अधिकजनसंख्यया अतिप्रयोगेन च अतोपि वर्धते, वर्तते एकं सार्वभौमिकं समाह्वाहनम् । तेन कथितं यत् विगतेषु कतिपयवर्षेषु भारतप्रशासनेन ग्रामीणभारताय सुरक्षितपेयजलं सुनिश्चेतुं उल्लेखनीया प्रगतिः अवाप्ता इति।

दिल्ल्याम् आगामि-विधानसभाया: निर्वाचनप्रचार: तीव्रीभूत:। आगामिनि मासे भविष्यमाणाय विधानसभानिर्वाचनाय समेषां राजनीतिक-दलानां नेतार: मतदातॄन् आक्रष्टुं प्रयासान् कुर्वन्तीति।

**निर्वाचनायोग:**

मुख्यनिर्वाचनायुक्त: राजीवकुमार: अद्य स्पष्टीकृतवान् यत् बायोमैट्रिक इति जीवमितीयप्रमाणीकरणम् एकम् आशाजन्यनवाचारं विद्यते यद्धि न केवलं छद्मअभिज्ञानस्य प्रत्युत एकाधिकमतदानं अल्पं करोति। एतदपि सुनिश्चीयते यत् अङ्कितमतदानम् उचित-प्रत्याशिने मिलितव्यम्। असौ नवदिल्ल्यां भारत-निर्वाचनायोगद्वारा आयोजितस्य द्विदिवसीय-सम्मेलनस्य द्वितीये दिवसे निर्वाचनप्रबन्धन-निकायान् सम्बोधयन् एतत् उक्तवान्।

**उपराष्ट्रपति:-बिहारराज्यम्**

उपराष्ट्रपति: जगदीपधनखड: अद्य प्रतिपादितवान् यत् भारतरत्न: कर्पूरी-ठाकुरवर्य: एक: सत्यनिष्ठ: राजनेता दूरदर्शी राजनीतिज्ञश्च आसीत् येन अनेके: परिष्कारात्मक-पदक्षेपा: उत्थापिता:। अद्य बिहारस्य समस्तीपुरस्य कर्पूरीग्रामे भारतरत्न अलङ्कृतस्य कर्पूरीठाकुर वर्यस्य एकाधिकैकशततम जयन्त्यवसरे आयोजिं एकं विशिष्टं समारोहं सम्बोधयन् उपराष्ट्रपति: निगदितवान् यत् सामाजिकन्यायाय आरक्षणं मातृभाषायां शिक्षाप्रदानं अन्ताजातीय-विवाह संवर्धनञ्च कर्पूरीवर्येण उत्थापितेषु प्रमुखेषु कार्येषु अन्यतमानि सन्तीति। श्रीधनखड: अग्रे अवोचत् यत् कर्पूरीठाकुरवर्य: कदापि राजनीतौ वंशवादाय बलं नैव प्रदत्तवान् तस्य च निर्दोषयुत: स्वभाव: स्मरणीय: अस्तीति।

राज्यसभाया: उपसभापति: हरिवंश: बिहारराज्यस्य राज्यपाल: आरिफ-मोहम्मद-खान: केन्द्रीयकृषि मन्त्री शिवराजसिंहचौहान: केन्द्रीय-गृह-राज्यमन्त्री नित्यानन्दराय: केन्द्रीयमन्त्रिणौ भागीरथ-चौधरी-रामनाथठाकुरौ च आयोजितेऽस्मिन् समारोहे उपस्थिता: अभवन्।

प्रधानमन्त्री नरेन्द्रमोदी बिहारस्य भूतपूर्व-मुख्यमन्त्रिणे भारतरत्नविभूषिताय कूर्परीठाकुर वर्याय श्रद्धाञ्जलिं समर्पितवान्। एकस्मिन् सामाजिक सन्देशपटले श्रीमोदी लिखितवान् यत् श्रीठाकुरवर्येण स्वीयं सम्पूर्णं जीवनं सामाजिक न्यायस्य कृते समर्पितम्। असौ अग्रे अकथयत् यत् श्रीठाकुरवर्यस्य जीवनम् आदर्श: च भाविंशेभ्य प्रेरणाप्रदौ स्त: इति।

**महाकुम्भ**

सम्प्रति महाकुम्भसम्बद्धा: वार्ता: श्रूयन्ताम्।

**उत्तरप्रदेशस्य मेलाप्रशासनेन महाकुम्भे मौनी अमावस्यायाम् अमृतस्नानाय व्यापकी सज्जता कृता अस्ति। दशकोटितोप्यधिक सङ्ख्याकानां: भक्तानाम् आगमनस्य सम्भावनाम् अवलोक्य तेषां च गतिं नियन्त्रयितुं दिङ्निर्देशाः दत्ताः सन्ति । घाट्टेषु जनसम्मर्दं नियन्त्रयितुं आवश्यक-संसाधनानि नियोजिताः भविष्यन्ति। घाट्टेषु उत्तमसुविधाः, सुरक्षा, स्वच्छता, शौचालयः, वाहन स्थापनव्यवस्था च सुनिश्चिता भविष्यति। प्रयागराजरेलस्थानकस्य बहिः खुसरोबाग इत्यत्र अतिरिक्तं क्षेत्रं निर्मितम् अस्ति, यत्र एकस्मिन् समये एकलक्षाधिकां यावत् भक्ताः निवासं कर्तुं शक्नुवन्ति। भक्तानां रेलस्थानकपरिसरं प्रति गमनात् पूर्वं खुसरोबाग इत्यत्र निवासे भविष्यति, ततः तेषां गन्तव्यरेलयानं प्रति भिन्नवार्णिक युतायाः यात्राचिटिकायाः माध्यमेन गमनं भविष्यति। अनया व्यवस्थया यात्रिणां गन्तव्यस्थानकं प्रति सुचारूतया गमनं भविष्यति, यत्र काऽपि भ्रामकस्थिति: न भविष्यति। महाकुम्भस्य आयोजनं सुरक्षितं सुव्यवस्थितं च कर्तुं अयं निर्णय: गृहीत: अस्ति।**

**बद्मिण्टनप्रतिस्पर्धा**

आस्ट्रेलियन्-ओपन्-टेनिस्-इत्येतस्यां प्रतिस्पर्धायां व्रणितस्य नोवाक्-जोकोविक् इत्येतस्य निवृत्ते: अनन्तरं अलेक्ज़ेण्डर् ज्वेरेव् इत्येषः पुरुष-एकल-वर्गस्य अन्तिमचक्रे समाविष्टवान् ।

**।। इति वार्ता:।।**